2.3.1 छात्र केंद्रित तरीके, जैसे अनुभवात्मक शिक्षण, सहभागी शिक्षण और संवाद मोड के माध्यम से सीखना और ज्ञान ग्रंथों और काव्यों के शिक्षण में हेर्मेनेयुटिक्स का उपयोग, समस्या निवारण पद्धतियों का उपयोग सीखने के अनुभवों को बढ़ाने के लिए किया जाता है।

***Student centric methods, such as experiential learning, participative learning and learning through dialogue mode and use of hermeneutics in the teaching of knowledge texts and Kavyas, problem solving methodologies are used for enhancing learning experiences***

---

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रधानतया शास्त्रिपाठयक्रमः आचार्यपाठ्यक्रमः शोधप्रविधिपाठ्यक्रमाश्च सञ्चाल्यन्ते। एतेषु पाठ्यक्रमेषु पाठ्यमानः शास्त्रीयाः विषया अधोलिखिताः विद्यन्ते-

| | |
|---|---|
| 1. | ऋग्वेद: |
| 2. | शुक्लयजुर्वेद: |
| 3. | कृष्णयजुर्वेद: |
| 4. | सामवेद: |
| 5. | अथर्ववेद: |
| 6. | वेदनैरूक्तप्रक्रिया |
| 7. | पौरोहित्यम् |
| 8. | नव्यव्याकरणम् |
| 9. | प्राचीनव्याकरणम् |
| 10. | गणितम् |
| 11. | फलितज्यौतिषम् |
| 12. | सिद्धान्तज्यौतिषम् |
| 13. | धर्मशास्त्रम् |
| 14. | साहित्यम् |
| 15. | पुराणेतिहास: |
| 16. | प्राचीनराजशास्त्रार्थशास्त्रम् |
| 17. | प्राचीनन्यायवैशेषिकम् |
| 18. | नव्यन्याय: |
| 19. | पूर्वमीमांसा |
| 20. | शांकरवेदान्त: |
| 21. | रामानुजवेदान्त: |
| 22. | मध्ववेदान्त: |
| 23. | निम्बार्कवेदान्त: |
| 24. | गौडीयवेदान्त: |
| 25. | बल्लभवेदान्त: |
| 26. | रामानन्दवेदान्त: |
| 27. | शक्तिविशिष्टाद्वैतवेदान्त: |
| 28. | दर्शनम् |

| | |
|---|---|
| 29. | तुलनात्मकधर्मम् |
| 30. | तुलनात्मकदर्शनम् |
| 31. | सांख्ययोगम् |
| 32. | आगमः |
| 33. | योगतन्त्रम् |
| 34. | बौद्धदर्शनम् |
| 35. | जैनदर्शनम् |
| 36. | प्राकृत एवं जैनागमः |
| 37. | पालि |
| 38. | संस्कृतविद्या |

अस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य एषां शास्त्रीयाणां विषयाणाम् अध्यापनम् प्राच्यां गुरुशिष्यपरम्पराम् अश्रित्य कुर्वन्ति। अस्मिन् विश्वविद्यालये अधीमानाश्घषाः अपि गुरुं प्रति मनसि श्रद्धां निधाय दत्तावधानाः मनोयोगेन अधीयते।

अतः एतादृशान् योग्यान् छात्रान् केन्द्रीकृत्य बहवो विधयः सञ्चाल्यन्ते येन तेषां भास्करकिरणैरिव अहर्निशं बुद्धिः वर्धत एव। ते छात्रकेन्द्रिताः विहायः सन्ति –

- **श्रवणपूर्वकं शिक्षणम् –** अस्माकमियं परम्परा वर्तते यत् श्रवणमाध्ययेनैव शास्त्राणां कण्ठस्थीकरणं भवेत्। तेनैव कारणेन वेदस्य एकं नामधेयं 'श्रुतिः' इत्यापि अस्ति। अत्र विश्वविद्यालयेऽपि छात्राः कक्षायाम् आचार्येण पाठितं पाठं श्रुत्वैव स्मरणस्य प्रयासं कुर्वन्ति। एतेन बुद्धिविर्धनमपि भवति।
- **अनुभवात्मकः अनुगमः -** सम्पूर्णानन्दसंस्कृतविश्वविद्यालये एतादृशाः बहवः प्रकल्पाः भवन्ति येन छात्राः स्वयमेव अनुभूय शास्त्रज्ञानं लौकिकव्यवहारञ्च प्राप्नुवन्ति। यथा अस्मिन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतये निर्मितायां नाट्यशालायां समये समये विविधान् नाटकग्रन्थान् समाश्रित्य नाटकानि आयोज्यन्ते। तत्र नाटके विधीयमानं नाट्यं नाटयित्वा छात्राः नूतनमेव किमपि तत्त्वम् अनुभवन्ति। विविधानां रसानां प्राप्तिं तत्र नाटके कृत्वान्ते अनुभवद्वारा शिक्षन्ते। विश्वविद्यालयस्य ज्योतिषविभागेन एक प्रकल्पः चाल्यते यत्र प्रौढाः छात्राः समागतस्य जातकस्य कुण्डल्यादिनिर्माणं कुर्वन्ति तथा च तत्रैव हस्तारेखादिविज्ञानमपि ते अनुभवद्वारेव जानन्ति तस्यां विद्यायां शनैः शनैः निपुणाश्च भवन्ति। एवं हि अन्येषु व्याकरणादिशास्त्रेष्वपि प्रकरणविशेषादिकम् अनुभवद्वारा दृढ़ कुर्वन्ति।
- **सहभागी अधिगमः-**विद्यायाः चतुर्थांशः सहाध्यायिभिः सब्रह्मचारिभ्यः इति पदे। इमं सिद्धान्तमास्थाय एव अत्र विश्वविद्यालये पठन्तश्छात्राः परस्परं सहभागेन अध्ययनं कुर्वन्ति। यथा वेदेषु उल्लिखितः वैदिकानिर्माणभागः परस्परं सम्भूय छात्रैः विचार्यते। पुनश्च विविधेषु यज्ञावसरेषु का वेदिका निमतिव्या इत्यपि विचारः क्रियते। इत्थमेव व्याकरणे पठितस्य विषयस्य मननम् अपि

सहभागेन एव विधीयते। छात्राणां बुद्धिवर्धनेन सह एव स्वास्थ्यमवर्धनमपि स्यादेतदर्थं विश्वविद्यालयस्य क्रीड़ाविभागेन क्रीड़ानामपि आयोजनं विधीयते यत्र छात्राणां सोत्साहं सहभागो भवति।

- **मननद्वारा शिक्षणम्** – युक्तिभिः चिन्तनं मननं भवति। संर्स्वृते सन्ति नैके ग्रन्थाविशेषाः यत्र युक्तिपूर्वकं चिन्तनं कर्तुं शक्यते। यथा – दर्शनम्, व्याकरणम्, वेदमन्त्रार्थाः। अप्रायि छात्राः एतस्य विधेः प्रचुरतया प्रयोगं कुर्वन्ति। ते अधीतविषयं मननद्वारा आत्मसात् कुर्वन्ति।

**अध्यापनविधयः**

- **वादविधिः –** वादवादेजायतेतत्त्वबोधः इति सिद्धान्तमास्थाय व्याकरणादिशास्त्रेषु प्रसृतान् विषयान् आदाय छात्राणां मध्ये वादोऽपि कार्यते येन तद्विषयस्य बहूनि नूतनानि तथ्यानि निःसृत्य बहिरायान्ति।

- **दृष्टान्तविधिः -** व्याकरणशास्त्रेस्फोटं, वर्णनित्यत्वम्, वेदान्तेअध्यासः, भ्रमः, मीमांसायांयागविधिः इत्यादिविषयान् पाठयितुं विधिरयं प्रयुप्यते। विविधैः दृष्टान्तैः कोऽपि विषयः सर्वथा स्पष्टो भवति।

अस्यां क्रीडाप्रतियोगितायां विजिताश्छात्राः प्रतियोगितानन्तरं कुलपतिवर्यैः पुरस्कारैः पुरस्क्रियते। एवमेव ऋग्वेदादिकस्य वेदपाठस्य अभ्यासकाले यदा समूहं निर्माय छात्राः वेदपाठं कुर्वन्ति तदा गुरुणा शिक्ष्यमाणोऽभ्यासविधिः तैरछात्रैः बहुधा अनुभवेन आत्मसात् क्रियते। एव ह्यन्येऽपि बहवः प्रकल्पाः सन्ति यत्र सहभागित्वेन छात्राः शिक्षणं प्राप्य आत्मनो जीवनम् उन्नतिपथं नयन्ति।

- **संवादद्वारा शिक्षणम् : –** गुरुशिष्ययोः परस्परं संवादमाध्यमेन यत् शिक्षणं भवति तदेव संवादशिक्षणमित्युच्यते। अस्यां पद्धतौ गुरुशिष्ययोर्मध्ये जायमानः संवादो मुख्यो भवति न तु केवलं शिक्षकस्य प्रस्तुतिरेव। एतस्मिन् उभयोः विचारयोः परस्परम् आदानं प्रदानञ्च भवति। अस्मिन् विश्वविद्यायलयेऽपि प्रत्येकस्मिन् पाठ्यक्रमे संवादद्वारा प्रशिक्षणस्य व्यवस्था व्यवस्थापकैः प्रकल्पिता वर्तते। कमपि विषयं छात्राः संवादमाध्यमेन साख्येन अधिगचछन्ति। पाठकाले केवलम् आचार्याः एव पाठ्यं विषयं न वदन्ति अपितु छात्राः अपि तत्तद्विषये आचार्यैः सह संवादं कृत्वा तद्विषयं ज्ञातुं प्रयतन्ते। एतस्य सूदाहरणं वर्तत अत्रत्य वादपरम्परा, वाक्यार्थपरम्परा, शास्त्रार्थपरम्परा। एताषु सर्वासु पम्परासु संवादमाध्यमेन एव निर्वाहो भवन्ति। कश्चिदपि एकं विषयं एव परस्परं संवादं कुर्वन्ति। व्याकरणादिविषये पाठितं प्रकरणविशेषादिकम् आदाय अपि बहुविधः संवादः छात्रेषु भवति।

वेदान्तशास्त्रस्य अध्यापनकाले विशेषेण अयं विधिः समास्त्रियते। अत्र ह्ययं विशेषः यथा कश्चित् रज्जुं परित्यज्यम भ्रमात् सर्परूपं गृह्णाति एवं मूढधीः सत्यमविज्ञाय जगत् पश्यति। किन्तुं सत्ये परिज्ञातै भ्रमरूपं विनरयति स चे मनुष्यः यथार्थे द्रष्टु समर्थो भवति।

- **व्याख्यानविधिना प्रशिक्षणम् :-** साहित्यादिशास्त्रस्य अध्यापनाय विभिन्नाः व्याख्यानविहायः आश्रीयन्ते येन छात्राणां बुद्धिः बोध्यो विषयः सरलत्यैव बुद्धिगम्यो भवेत्।

- **कथाविधेप्रयोगः -** प्रायशः धर्मविषयकाणां ग्रन्थानाम् अध्यापनकाले विशेषतया अयं विधिः प्रयुज्यते। यत्र अनेकग्रन्थानां प्रसङ्गेन प्रतिपाद्यमानो विषयः स्पष्टो भवति।
- **समस्यासमाधानविधिः -** सर्वेषु विषयेषु विधेरस्य प्रयोगोऽत्र विश्वविद्यालये विधीयते छात्राणां मनसि पूर्वं समस्यामुत्पाद्य ततः तस्य समाधानं पुनः समस्या पुनश्च समाधानमिति विधिना विषयो बोधगम्यो भवति।
- **टीकाभाष्यपद्धतिः-** तत्सद्विषयस्य ग्रन्थानाम् अध्यापनकाले तैः ग्रन्थः सम्बद्धां टीकाः भाष्यादिकम् आसृत्य व्याख्यानं विधीयते।

- **स्वाध्यायाद्वारा : -** महाभाष्यकारेण पतञ्जलिना प्रोक्तम् – चतुर्भिध प्रकारैः विद्योपयुक्ता भवति, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति, कक्षायाम् अध्यापितस्य विषयस्य पश्चात् स्वयम् अध्ययनं स्वाध्यायो भवति। अस्य विश्वविद्यालयस्य विद्यार्थिनोऽपि कक्षायाम् अधीतविषयं स्वाध्यायपद्धत्या सम्यगवगच्छन्ति। यथा व्याकरणे कश्चित् शब्दं पठित्वा स्वाध्यायेन स्वयमेव जानन्ति यत् केन तुल्यं कस्म रूपं प्रचलतीति।
- **प्रश्नविधिना शिक्षणम् –** प्राचीनकालादेव मनुष्यो जिज्ञासुप्रवृत्तिर्विद्यते। तद्यथा महाभाष्ये प्रदर्शितम् – 'क्वेमे दिवा भृशा भवन्ति'। कश्चित् मनुष्यः जिज्ञासते यत् एते चन्द्रतारकाः दिवसे कुत्र विलुप्ताः भवन्ति। वेदेऽपि 'कः' स्विदकाकी चरति इत्यादैकः प्रश्नविधिः दृश्यते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेऽपि कक्षायाम् आचार्यैः अध्यापनाय तादृशीः सरणी अनुस्रियते येन छात्राणां मनसि स्वयमेव प्रश्नं प्रष्टुं जिज्ञासां भवेत्।
- **प्रयोगपूर्वकं शिक्षणम् –** अस्मिन् विश्वविद्यालये केचन विषयाः ईदृशाः अपि सन्ति येषां सम्यगवगमः प्रयोगं विना न भवितुं शक्नोति अतः तादृशनां विषययाणाम् अध्यापनान्तरं तद्विषयकः प्रयोगोऽपि अत्र शिक्षणप्रक्रियायाम् आश्रीयते। यथा – सोमयागाद्यवसरेषु वेदिकानिर्माणं कथं भवति ? ज्योतिषशास्त्रे दूरवीक्षणमाध्यमेन कथं नक्षत्रग्रहाणां दर्शनं कृत्वा तेषां दौर्यएवज्ञानं भवति। कर्मकाण्डविषयं स्थाने स्थाने गत्वा कर्मकाण्डस्य आयोजनेन जानन्ति।

एभिः सर्वैः विधिभिः सहैव यथाकालं यथापरिस्थिति अन्येऽपि विधयः आचार्यैः पाठ्यमानाम् विषयान् बोधगम्याम् कर्तुम् आस्रियन्ते येन अस्य विश्वविद्यालयस्य छात्राः कस्यापि विषयस्य पठने बौद्धिकदृष्ट्या मानसिकदृष्ट्या वा सबलाः भवन्त्विति।